हाग्रनावपि प्रयोजनार्थमुच्चारणं क्रियेत: यत:
पूर्वकर्मनिवेशितगुणवाक्यत्वादेतयोः कर्मांतर
विधायित्वानुपपत्तेरेकत्वे ज्योतिष्टोमाभेद एवात्र प्रती
यत इति व्याख्येयं १ अवेष्टौ यज्ञसंयोगात्क्रतुप्र
धानमुच्यते राजसूये अवेष्टिनामकानि पंचक
र्माणि समाम्नाति आग्नेयोष्टाकपालो हिरण्यं द
क्षिणा ऐंद्रमेकादशकपालं ऋषभो दक्षिणा वैश्वदे
वं चरुं पिशंगी पष्ठौही दक्षिणा मैत्रावरुणीमामि
क्षां वशा दक्षिणा बार्हस्पत्यं चरुं शितिपृष्ठो दक्षिणेत्ये
तैर्वाक्यैः अत्र च गुणवाक्ये एकावेष्टिसंज्ञायोगे
पि सा कर्मैव तदुत्पत्तिवाक्ये अन्यैकदक्षिणा-
म्नानाद्दक्षिणायाश्च कर्मानस्वर्थत्वात्तद्भेदेनक
र्तृभेदप्रतीतेस्तद्भेदेन च प्रयोगभेदावगतेरे
कैकं कर्माग्न्याधानादिवाहरणतपणं तोग
विशिष्टभेदेनाष्टेयमित्येकादशैव समाणा
कादविकाद तदंतरप्रकरणे च यदिक्कास्ला

णोयजेत बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हु
त्वा तमभिघारयेत् यदि राजन्य ऐन्द्रं यदि वैश्यो
वैश्वदेवं इत्येवं समाम्नाते तत्रापि किं पूर्ववद्
वब्राह्मणादिग्रहणं निमित्तार्थमनूद्यत विधाना
र्थमिति संशयः ब्राह्मणत्वादेर्गुणस्यानिश्चित
विधेयताकत्वात्कृतिसाध्यत्वाभावाच्च तत्प्रयोग
भेदनिरूपणेन पादाध्यायसंगतिः स्वामिगुणा
दीनां च विध्यापादनद्वारा भेदकत्वात्क्रत्वादीनां
च गुणानां भावनोत्पत्तावनन्वयित्वेन तद्विध्यापाद
नद्वारा तद्भेदकत्वाभावेऽपि प्रयोगान्वयित्वात्तद्वि
ध्यापादनद्वारा भावनाप्रयोगभेदकत्वनिरू
पणाच्चाध्यायसंगतिः अनेन राजापवादिकी
तत्र पूर्ववदेव यदिशब्दसंयोगाद्विशिष्टविधि
गौरवाभावाच्च ब्राह्मणत्वादिकर्तृत्वसंबंधेन
निमित्तं न च क्षत्रियमात्रकर्तृकराजसूयान्तर्ग
तावेष्टौ ब्राह्मणवैश्ययोरनेन संबंधेन प्राप्त्यभा
वात्तत्क्षत्रियस्य च नित्यप्राप्तत्वेन निमित्तत्वानुप
पत्तेः कथं पूर्वाधिकरणन्यायविषयत्वमिति वा
च्यं राजसूयाधिकारवाक्यस्थराजपदस्य क्षत्रिय
मात्रवाचित्वाभावेन तस्य तन्मात्रकर्तृकत्वासिद्धेः
तथा हि आर्यावर्त्तीनार्यावर्त्ते साधारण्येनाविगी
तत्वाल्लौकिकप्रसिध्या राजशब्दः मनुष्यमा
त्रवृत्तिरन्याप्रेरितप्रजापालनकर्तृत्वे शक्तः
चोरादिप्राहादवपरत्राणकर्तृत्वे प्रवर्ता

लोके राजशब्दप्रयोगाभावादस्माद्देशीयैर्न विशेषणं
न च समर्थविज्ञापोपेक्षाकालतावच्छेदकान्तकल्पने गौरवा
पत्तेः द्रविडनामपालयप्रपिदत्रियेव राजशब्दप्रयो
गाज्जातिवाचित्वमेव लाघवात्कल्प्यमिति वाच्यं ३
विडमा प्रत्यन्तदेशनिवासित्वेन म्लेच्छदेशस्थत्वान
त्सिद्धेरार्यावर्तसकलजनप्रसिद्धितो दौर्बल्येन
पीलुशब्दवद्राजशब्देऽपि शक्तिग्राहकत्वानुपपत्तेः
न हि शक्तिग्राहकप्रमाणानां प्राबल्य एव निर्णाय
केऽसति लाघवस्य शक्तिनिर्णायकत्वं शकानेवल्क
लाघवस्य प्रमाणानुग्राहकत्वेन तत्सन्देह एव निर्ण
यकत्वात् प्रयणाम्बवालशब्दस्य क्षवयवशब्दे व
विशिष्टार्थबोधकत्वोपपत्तेः प्रबलस्यापि शक्तिग्रा
हकत्वानुपपत्तेः अतएव न हि राज्यादिशब्दस्य लव
तज्जातिविहाय कश्चिदप्ययोगेण लाघवस्य निया
मकत्वोपपत्तेः प्रकृते तज्जातिव्यभिचारेण प्रबल
प्रमाणसिद्धेनोपाधिव्यभिचारस्य दुर्बलप्रमाणप्र
सिद्धस्य बाधानुत्तस्य जातिवाचित्वनिर्णायकत्वोप
पत्तेः न तु स्वरूपेण दुर्बलस्यापि व्याकरणादिस्मृ
त्युपष्टब्धत्वेन प्राबल्योपपत्तेः तथा हि तस्य कर्मेत्य
र्थे राजशब्दात् ब्राह्मणादिगणपठितात् ष्यञ्प्रत्य
ये पुरोहितादिगणपठिताद्वा यक्प्रत्यये पत्यन्त
पुरोहितादिभ्यो यगिति सूत्रेण स्मरति याज्ञिकानाद
यतत्स्वराजः कर्म राज्यमिति वै प्रजापालने राज
कर्मणि राज्यशब्दप्रवृत्तेः राजशब्दस्य च ब्राह्मणादि

कौ दि ५

शब्दवत्प्रजापालनकारिवाचित्वानुपपत्तेः सिद्धवन्नि
र्देशेन जातिवाचित्वावसीयते तथा राजन्यशब्द
स्य क्षत्रियमात्रवचनत्वेन निःसंदिग्धस्य राजन्यश्रु
गत्यादिसहचरेण तस्यापन्नामित्वसिद्धत्वेऽपत्यत्वपवि
धानेन राजशब्दप्रकृतिकत्वान्यथानुपपत्त्यापि क्ष
त्रस्यापत्यं क्षत्रिय इतिवद्राजशब्दस्यापि जातिवाचि
त्वमवसीयते तथा मन्वादयोऽपि क्षत्रियस्यैव प्रजा
पालनेन परमो धर्मः राजा सर्वस्येष्टे ब्राह्मणवर्जं
मित्यादिवाक्यपरिशीलनेन राजपुरस्कारेण प्रजापालनवि
धानाद्राजशब्दस्य पूर्वप्रसिद्ध्यपेक्षया क्षत्रियमात्र
पुरस्कारेण तद्विधानाद्राजशब्दस्य क्षत्रियमात्रवा
चितामनुमन्यन्ते अतः स्मृत्यपेक्षया सुष्ठु बलस्यापि
प्रमाणस्य शक्तिग्राहकत्वोपपत्तिरिति चेन्न प्र
बलस्यापि प्रमाणस्याननुत्तः प्रतिपक्षीयाद्राजन्य
प्रसक्तिनः न शूद्रराज्ये निवसेदित्यादिस्मृत्युपनावि
रोधेन शक्तिग्राहकत्वोपपत्तेः किंच न व्याकरणादि
स्मृतिः शक्तिग्राहकप्रमाणं साधुत्वादिकथनमात्रप
रत्वात् अथापि प्रमाणं स्यात्तथापि न तत्पालनका
रिवाचित्वं व्यावर्तितं तत्त्वेऽपि राजशब्दस्य तत्कर्मवा
चित्वोपपत्तेः न चैवं तावता राजशब्दश्रुतिग्रहस्यापे
क्षत्वाद्राजशब्दश्रुतिग्रहस्यापेक्षत्वे राजशब्दश्रुति
ग्रहस्य तदभावेऽपि पालनेन वृद्धसेवनस्य कर्तृत्वेना
वेद्धृदकत्वोपपत्तेः राजशब्दप्रवपरमवृपवार्थप्रस्त
त्वाभिज्ञानाच्चार्यशब्दवत्पालनमात्रवृत्तित्वपाल
नकारिकर्मणि योगिको ह्येतावानेवेतावता

इत्येतत्राश्च यतं राजन्यशब्दान्याख्यामेतुकान्याय
नेनैव राज्ञोपपत्तेर्जातिग्रहणमिति परिसंख्यानाद्रा
जन्यशब्दस्य सामान्यतः पालनकार्यपरत्वाविते
नप्रसक्तस्य पंकजादिशब्दवत् तद्विपत्तस्समाना
धिकरणस्यैवतस्यवाच्यत्वनियमरणेन शूद्राज
पदस्यपालनकारित्ववाचित्वाभ्युपगमानाहि परीत
मायंतत्तेनच जातिपदस्य मनुष्यत्वादिजातिमात्रे
णाप्युपपत्तेः क्षत्रियत्वग्रहणएवप्रमाणाभावः वि
धानसामर्थ्यादेवमनुष्यत्वप्राप्तेर्मनुष्यत्वग्रहण
संभवेन राजशब्दस्य क्षत्रियमात्रप्रयोगेण च क्षत्रिय
त्वग्रहणोपपत्तेः मन्वादिस्मृतेस्तु क्षत्रियमात्रोद्देशे
नपालनावश्यकत्वविधायकत्वेपि रागादिना ब्राह्म
णादावपि पालयितृत्वसंभवाज्ञोपष्टंभकत्वान
हि विहितपालनकारित्वे राजपदप्रयोक्तृत्वावच्छेद
कंगौरवापत्तेः प्रमाणाभावाच्च किंचार्यावर्ते
प्रयोगएवपरंपराब्राह्मणोपजीव्यादिवाकात्रा
पस्यपदिशाद्वेन निमित्तत्वाविनापादिकप्रसि
मपेतमाणेन क्षत्रियमात्रवृत्तेरेतदनुपपत्तेराज
शब्दस्यपालयितृवाचित्वमापतितोपष्टंभः
अपेराजशब्दस्य क्षत्रियमात्रवचनत्वाभावा
दपालयितृत्वाहितमात्रफलस्य पालयितृवि
कारमात्रपरत्वावगतेराहितत्वादिरूपपिका
रिविशेषणेन शूद्रादिव्यावृत्तेनावपित्रस्त

णादिष्वानुवृत्तौ प्रमाणाभावाद्राजसूयस्यपाल्यपिते
त्रैवर्णिकाधिकारिकत्वावगतेस्तं दत्तगीतायामस्य
वैश्याद्याहरणादेः प्राप्तत्वाद्भिन्नत्वोपपत्तिः तत्रैमि
त्तिकश्चेदाह सत्यमादिमध्येनिपातनरूपैकप्रयाजस्य
भिधारणविशिष्टः प्रयोगः नत्वभिधारणमात्रं मा
ध्येनिपातनविशिष्टाभिधारणस्य च बहुविधैकेष्टिप्र
योगं विनानुपपद्यमानस्यैकैकहविर्वैकेष्टिप्रयोगे
ष्वनिवेशात् अतएवाभिधारणस्य कर्मोत्पत्त्व
पितोपि न कर्मान्तरोत्पकत्वं तथा तेन सदर्शपूर्ण
मासप्रकृतिकत्वापत्त्या प्रकृतहविर्मध्यनिपातन
रूपविशेषणानुपपत्तेः अतो मध्येनिपातनरूप
विशेषणसामर्थ्यादभिधारणस्यापि अवेष्टिप्रयो
गान्तरोत्पकत्वमेव नचैवं पूर्वपक्षसिद्धांतयो
रुभयोरपि प्रयोगान्तरत्वे भेदाभेदचिन्ताभावाल्ल
क्षणासंगतिः ब्राह्मणादिनृपस्यगुणस्यवाकामे
नोपादनविधयाभेदकत्वविचारेणसंगत्युपपत्तेः
तत्प्रयोजनं च राजसूयाद्बहिरपि ब्राह्मणादिकर्तृ
कावेष्टिमात्रप्रयोगसिद्धिः ब्राह्मणादिस्ववर्णस्य
निमित्ताद्यावेदि राजसूयान्तर्गतोपि नैमित्तिकः पंच
हविष्कैकेष्टिप्रयोगः स्यात् प्रापकत्वपक्षे तु बहि
र्वसति प्रयोजनं अतएवं पंचेष्टिप्रयोगा अपि वाहु
द्दिगादिवदनुलोमादिविषयत्वेन स्थापनीयाः अत
एव राजसूयान्तर्गततत्प्रयोगाणां राजसूयाधिका

रविधिनास्वाराज्यफलकत्वावगमेपि एतयान्ना
द्यकामं याजयेदिति अधिकारांतरविधिनानि
त्तनैमित्तिकानामवेष्टिमात्रप्रयोगाणामन्नाद्यरू
पफलसंबंधस्याप्यवगमात् अंगप्रयोगेवधायासि
ध्यधिकन्यायेनानेकफलजननायोगाद्राजसूयाद्ब
हिरपितत्प्रयोगाणामन्नाद्याद्यर्थमनुष्ठानेवेदितव्यं
नैनैतावतान्नाद्याद्यर्थत्वेपिप्रयोगांतरविधिः तत्फले
चवेनफलसंबंधमात्रपरत्वोपपत्तेःप्रयोगांतरवि।
धायित्वेप्रमाणाभावात् अतएवतस्यैवप्रयोगस
बहिर्भावेकिंभेदमात्रेणतद्वैजात्यं तस्माद्ब्राह्मण
वाहिनिमित्तेस्वाराज्यार्थंअन्नाद्यार्थंवामध्येनिधा
नभूतैकाभिघारणविशिष्टावेष्टिप्रयोगएवतत्र
होकेविधीयतइतिसिद्धंब्राह्मणश्रवणस्यनिमि
त्तार्थत्वादभेदकत्वमितिप्राप्तेभिधीयतेनैतन्नि
मित्तार्थंनि। अप्राप्तत्वाद्राजसूयेब्राह्मणस्यैवनोत
थाहि नराजशब्दःप्रजापालनक्रियाकर्तर्येवावीद्
विज्ञानामप्रपालयत्यपिदक्षिणेयेराजशब्दप्रयोगे
णपालनस्यबर्हिरादिशब्दवत्संस्कारस्येवाभि।
धानात् नचार्यावर्तेसकलजनानांपालयितरिब्रा
ह्मणादावपिप्रयोगेणबलीयसाजातेरपिव्यभि
चारादवगमात्पालनवाचित्वनिश्चयः बलीयसो
पिबलवत्प्रमाणानुगृहीतेनवृद्धप्रयोगेणबा
धात् अस्तुतावत्स्मृतेरनुग्राहकत्वंप्रकृतिरेवसक
लप्रमाणमूर्धन्यानुग्राहिकास्मस्ति अभिषेको

कौ
हि
११

हिपालनाधिकारसंपत्तये तद्विधपुरस्कारेण स
माम्नातः न हि यौवराज्ञानभिषेचयेदित्यत्र राज्ञो
द्देशेनाभिषेको विधीयते उद्देश्यस्य च पूर्वं प्रसि
द्धिस्यापेक्षत्वात्तत्र पालनकर्तृत्वाचित्वस्यासंभवति
न हि अभिषेकात्पूर्वं पालयितृत्वमस्ति अभिषे
कस्य पालनाधिकारसंपादकत्वेनैव विधेयत्वात्
न चाभिषेकात्पूर्वं पालयितृत्वासंभवेपि तद्योग्य
त्वमादाय वराजशब्दप्रसिद्ध्युपपत्तिः तर्हि योग्य
त्वमात्रे तत्र राजपदस्य लक्षणा शक्तिर्वा नाद्यः
मनुष्यमात्रस्य प्रजापालनयोग्यत्वेन पालन
योग्यस्य पालनाधिकारसंपादकाभिषेकविधि
सामर्थ्यलभ्यत्वेन वराजपदवैयर्थ्यापत्तेः अ
तएव न द्वितीयोपि राजशब्दस्याधिकारवाक्यस्थ
राजपदस्यापि व्याख्यात्वाभावेनास्मिन्पक्षे वैयर्थ्या
पत्तेः न च कौपधीयोयातिशब्दवत्स्य पालनयोग्यता
वच्छेदकत्वांगीकारान्न द्वितीयत्वाहस्यापि राजपदस्य
र्थ्येक्यापपत्तिरिति वाच्यं कोपधीयतिशब्दवत्पाल
नयोग्ये ब्राह्मणादौ राजपदप्रयोगाभावेन तादृ
शयोग्यतावच्छेदकावच्छिन्ने राजपदशक्त्यंगीकारे
शक्तिग्राहकप्रमाणाभावात् अतो योग्यतामादाय
पालनमादाय वा राजपदस्याभिषेकविधिस्थस
र्वं प्रसिद्ध्यनुपपत्तेर्द्विरुद्धप्रयोगो नीतेतत्क्षियवा
चित्वमेवाभिषेकविधिरनुमन्यते एतेन पूर्वं प्र
सिद्ध्यभावेपि संपद्यिन्नतीतिवदभिषेकगन्याद
एवत्वस्यैव राजपदस्याकृतनावच्छेदकत्वं नहि पि

अवेष्ट्यनन्तरकालं तत्फलेनैव विधेयोपपत्तेर्न द्विरुप्र
योगो ब्रीनत्वविधयवाचित्वसंभवस्तत्पक्षे ब्रीहि
नवहंतीत्यादिवत्कथंचिदपि पूर्वप्रसिद्धिसंभवे
अभिषेकपरत्वविधेः गुरुभूतशास्त्रतावच्छेदक
विषयताक्रियाहकत्वकल्पने गौरवापत्तेः अभिषे
कस्य ब्राह्मणादावविहितत्वेन कृतेप्यभिषेके तज्ज
न्यादृष्टवत्वे प्रमाणाभावाद्ब्राह्मणादे राजत्वप्रापि
कारणाभावप्रसंगे न भवदिष्टसिद्ध्यभावाच्च अतए
व नराजेत्येनानभिषिक्तानाचष्टेतत्यादिलिंगा
न्याभिषेकजन्यादृष्टवत्वे राजपदस्य शक्तिरित्ये
वं परास्त शक्यतावच्छेदके गौरवान्न अपितु
निकृष्टलक्षणपरत्वेत्यस्य पोजनं च राजस्य प्र
जापालनादिविधौ अभिषिक्तत्वविधयपरत्वसिद्धिः
अतएवाभिषिक्तत्वविधयलक्षकराजमात्रपदिक
वदितराजस्य पदस्यापि तल्लक्षकत्वप्रसक्तौ परिसं
ख्यानार्थं राज्ञोपर्यनुजातित्रहणमिति वार्त्तिकं ते
न राजस्य पदस्यानाभिषिक्ते निरूढलक्षणत्वापि सि
ध्यति अतः कृत्स्नपदवाक्यद्विरुप्रयोगेणावलाघव
तर्के सहकृतेन तत्त्वविधयवाचित्वसिद्धिः अर्थावत्तेप्र
योगास्तु राजकर्तृपालनकारित्वाद्गौणाः एवं च आ
करणादिस्मृतिरपि नचौर्यादिशान्तिवत्पालनका
रिकर्मणि राज्यशब्दः साधित्वेवं परत्वेन व्याख्येया
पितत्वविधयकर्मणीत्येवं परत्वेनैवेति दृष्टव्यं यदि
शाद्वत्वं निपातत्वात्सर्वोपि करणोक्तमालिङ्गे

कौ
दि
८

देवते देवत्वमज्ञावादिप्रवृत्तान्ययोग्राहकतयापि वा
ख्यायमानो न तु षष्ठीति ब्राह्मणादीनां राजसूयप्रा
प्य भावान्निमित्तार्थत्वानुपपत्तेर्दृष्टैव विधेयब्रा
ह्मणादिरूपगुणवत्त्वान्ययोगभेदसिद्धिः यथैव हि
मध्येनिधानविशिष्टाभिघारणस्यैवप्रयोगे यु
क्तं पञ्चत्वाकारीत्यात्रनिविशमानत्वात्प्रयोगभेदक
त्वं तथैव ब्राह्मणत्वादेर्निर्दिष्टत्वात्त्रियमाणकर्त्तृ
कावेष्टिप्रयोगेष्वनिवेशात्राकपादकत्वात्प्र
योगभेदकत्वं युक्तमेव अतो ब्राह्मणादिसकल
विशेषणविशिष्टैकप्रयोगो विधीयते वार्तिक
कर्मान्तरविधिपक्षस्तु वाजिनादिवदुत्पन्नविधिगु
णाभावात् सौटिमान्नोयोपि अभिघारणप्रलक्षण
गुणः सोपि मध्येनिधानरूपविशेषणसामर्थ्यात्प्र
योगालेपकएव कर्मान्तरविधिर्विहितस्य दर्शपू
र्णमासविकारत्वापत्तेः कुत्रचिदाम्नातत्वे हविर्वि
कारत्वेपि एकविकारत्वापत्तेश्च हविःप्रक्षभावे
नमध्येनिधानानुपपत्तेः अतः प्रयोगान्तरमेव
विधीयते तस्य च पर्शिग्राहकप्रमाणेनैव राजसू
यवहिर्भावसिद्धिः अतएव ब्राह्मणादिश्रवणेन
ष्टिष्वेष्टिप्रयोगएव राजसूयमहाप्रयोगा
न्तर्गतत्वनिवेदितव्यः अतएव बहिस्तुष्टीयमान
एव ह विष्टकेष्टिप्रयोगस्य फलापेक्षायामपेक्षि
तविधानन्यायेनएतयाज्ञापकामंयाजयेदित्यनेन
फलसंबंधः क्रियते तस्येकेकहविःप्रयोगभ्यो

नात्राप्योत्पत्तिः अपितु राजसूयमहाप्रयोगांतर्गतेभ्य
स्तेभ्यः स्वाराज्योत्पत्तिरेव अतएव च प्रकृतयंराम
र्थेन तछब्दनिर्दिष्टावेष्टिमात्रपरत्वाद्वेणात्राप्यात्म्ना
नात्रिरवकाशत्वात्राप्यावरुद्धावेष्टिर्निराकांक्षत्वात्
तच्छ्रुतिर्लिंगविषयेपि सावकाशा स्वाराज्यस्य कृत्स्नप्र
पालं अत्राप्यस्यापि ब्राह्मणादिकर्तृकप्रयोगे सावकं
शत्वात् अतश्च राजसूयप्रकरणपाठसामर्थ्याद्यार्थप
कैकहविष्केष्टिप्रयोगाः स्वाराज्यफलका एव न च वि
नियमका विरहश्ब्राह्मणादिसंबंधस्यैव स्वाराज्यप्र
योगेप्यसंबध्यमानस्य नियामकत्वात् किंचायमप्य
च प्रयोगभेदेन स्वातंत्र्यान्निरवकाशेनापि फलेना
वरुद्धप्रवेष्टिः सावकाशेनापि फलेन संबध्यते वा न
वाजिनोपांशुत्वादिन्यायः तत्र हि वाजिनो पांशुत्वा
देर्गुणभूतत्वाज्ज्ञामितायागादौ त्वाणी पादेहत्यत्ति
सिद्धनिरवकाशगुणावरुद्धेकोदात्तापना सम
वाच्छ्रुतो वायुः प्रकृते तु सावकाशस्यापि प्रधानस्य
फलस्याकांक्षायापकत्वोपपत्तेर्न वाचोपयुक्तः अ
तएवोत्पत्तिशिष्टनिरवकाशपशुत्वफलावरुद्ध
स्यापि पशुक्रतादेर्विविदिषाफलेन आकांक्षायाप
नेनैव संबंधायोगाद्रक्षायागत्वेन प्रमितस्यापि मंत्रस्या
काङ्क्षापनेन लिंगादिनांगत्वापत्तेः लिंगो ज्ञातस्य
नैः कल्पत्वेन तत्र स्वारसिकाकांक्षाया एव कारणा
त्वात् अस्तु वा निरवकाशेन विशेषिणा सावकाश
स्यापि शेषिणो बाधः तथापि सर्वोक्तविषयस्य अत्राप्य

स्यापि सावकाशत्वात्तस्या राजन्यतल्पत्वं अत एव दिग्विजयोप
यदिष्टो नृपस्य दितो यं दिग्गोनुव्यवस्थापयंति दिग्याम
वेद्द्यो भवंतीति राजसूयंगतया विहितदिग्व्यवस्था
पननिमित्तोक्ताद्परिहारसाधनत्वेनावेष्टीनां ल
त्तिरपि राजसूयप्रयोगांतःपातादुपपद्यते एतेन
कैकहविष्टेष्टिपंचकस्य राजसूयप्रयोगांतःपाते
पि द्विविधस्यापि प्रयोगस्याराध्यफलकत्वमेतच्छे
नपरामर्शो विशेषादित्यपास्तं सन्निधानाविशे
षेपि आकांक्षितसंबंधस्य न्याय्यत्वेन ब्राह्मणादि
कर्तृकप्रयोगस्यैवाराध्यफलकत्वौचित्यात् ते
न सिद्धं राजसूयाद्बहिरनुष्ठेयानि प्रयोगांतराण्येव
वाराध्यफलकानि विधीयंते ब्राह्मणादिवाक्ये
रिति तत्र ब्राह्मणवैश्यवाक्ये न हि यानेपि राजन्य
वाक्ये राजन्यस्य राजसूये प्राप्तत्वेनाविधेयत्वान्नि
त्यप्राप्तत्वेन च निमित्तत्वायोगेपि पदिष्टस्य ब्रा
ह्मणवैश्यवाक्ययोरिव पवित्रत्यागादिना राजन्य
स्यानुवादमात्रत्वोपपत्तेर्मध्ये निष्पन्नस्य पंचेष्टि
प्रयोगेष्वतिदेशेन प्रयोगांतरविधायकत्वेपि तस्य
स्वाराज्यफलार्थं राजसूयप्रयोगांतःपातेनैव वि
कल्पेन समुच्चयेन वा करणोपपत्तेर्न प्रयोगा बहिर्भा
वोपपत्तिरिति वाच्यं राजन्यपदस्यानुवादमात्र
त्वे वैयर्थ्यापत्तेस्तस्य चाभिषिक्तानभिषिक्तसा
धारणत्वे क्षत्रियमात्रवाचित्वेनानभिषिक्तक्ष
त्रियस्य राजसूये प्राप्तस्यानुवादा ॥

योगाद्राजन्यस्य स्थपतित्वविधापित्वावगतेश्चोद्भूता
दिवाकस्मात्येनाभिषक्तानभिषिक्तक्षत्रियधारणे
न राजन्यस्य प्रयोगबहिर्भूतस्य योगेनत्वविधापित्वस्य
वावसायात् अतः सिद्धं ब्राह्मणगुणस्य भेदकं त्वेन
वैतेषु प्रयोगेषु दक्षिणाभावश्रौतत्वनिर्कोदक्षिणाया
एकैकस्य विश्वक्प्रयोग एवावगतत्वादिति वाच्यं यस्मात्
प्रयोगाद्वैपकत्वे पिसांगप्रधानांगत्वेनेहापि निरूढ
पश्वादौ माहावेदिवत्पयोतः अतएव वेदिशास्त्र एवंप्रदे
पिनैमित्तिकप्रयोगदक्षिणाप्रामिनुपपादनीयाप्र
योजनं प्रसंगात्पूर्वमेवोक्तं स्थ्वेतत्प्रवेशवोतत्व
करणस्य शुद्राह्मणादिवाकोशुद्रात्मणादिरूपप्रव
र्णकत्वप्रधाने अवेष्टि प्रयोगभेदनिधानसंकराज
मे सूयेयत्तेतत्रियसैव योगे मब्राह्मणादीनामप्यामा
त्वानं विधेयत्वात् इति सिद्धं १ । आधाने सर्व
शेषत्वात् ॥ अनारभ्याधीते वसंते ब्राह्मणोग्नीना
दधीत ग्रीष्मे राजन्यः शरदि वैश्य इति तथा वसं
ते ब्राह्मण उपनयीत ग्रीष्मे राजन्यं शरदि वैश्यं इत्या
दि तत्र एवं वेदे ब्राह्मणादिः कर्मणो निकालवि
धौ ब्राह्मणादिविधौ कालश्रवणानि निमित्तार्थानि
उत स्वत्वात्के आधानविधिवोपनयनादेशेपकानी
ति संशयः पासाध्याय संगतीः सर्वत्र अत्र पूर्व
वराजस्य प्रथमत्रियमात्रकर्तृकत्वाद्ब्राह्मणादीनां
कर्तृमप्राप्तेश्च कास्विधेयत्वेन भेदकत्वप्रकृतेत्वा
धानस्योपनयनस्य वा प्रत्येकदेवसर्वकालकर्तृक।

कौ हि ५४

तोपपत्तेः प्राप्तानां ब्राह्मणादीनां निमित्ततोपपत्ति
रिति एवं पतितत्वानामुक्त्वा तत्र निरूपकाभावस्याथा
रणेन सर्वेषां क्रतूनामग्निविद्यासापेक्षत्वाद् अग्निवि
षयोऽस्म जनकीभूताधानाध्ययनापेक्षत्वादध्य
यनस्य चोपनयनसाध्यत्वात् क्रतुविधानामाधानो
पनयनादेः पकत्वमवगम्यते न वाधानोपनयनयोः
पर्वंपरया क्रतुजनकत्वेपि अंगतानाग्रहकत्वप्रमा
णाभावेन क्रत्वंगत्वात् क्रतुप्रयोगविधिविषय
त्वाभावेन कथं तत्स्वयं क्रतुमितिवाच्यं अन्नंगस्या
पि अभिक्रमणादिवदन्यथानुपपत्तिमात्रेण प्रय
न विधिसम्बन्धकत्वोपपत्तेः अध्ययनवत्तयाजविधिरे
वप्रयोजककरणे चेत् ततोऽपि प्राग्निरध्ययनेव
अंगताभावपि जनकत्वादाधानोपनयनयोः प्र
योजकमित्यपि शंकां वर्क्ष्ये आधानतत्स्यवस्त्रमाण
रीत्याविहितत्वस्यापि सत्वेनांगतोपपत्तेश्च
तः क्रतुविधिप्रयुक्तप्रयोगाधानोपनयनयोरुक्तत्वे
कत्वेऽनतिरिक्तत्वात् क्रतूनां चस्तुगीकामत्वाविशे
षेण ब्राह्मणादिकर्तृकत्वात् तदातिमाधानोपन
यार्थपि ब्राह्मणादिकर्तृत्वप्राप्तेर्ब्राह्मणत्रयवर्णस्य
निमित्तार्थत्वोपपत्तेः नवाउपदिशहृद्यभावान्नि
मित्तत्वानुपपत्तिः उपदिशहृस्यापि प्रामित्येन तकह
मात्रत्वेन सहकृतेतरभावपिप्राप्तिमात्रेण निमित्तत्वो
पपत्तेः नैमित्तिकस्य वसन्तादिकालाधिकरण
तानियमः अत एव कालस्य संध्यावंदनादिव निमि

ध्यापनात्तु ध्यानविषयत्वरूपनैमित्तिकत्वासंभवे
पि निमित्तान्वयव्यतिरेकानुविधाय्यपि करणत्वाक
त्वमेव तदिति द्रष्टव्यं आधानोपनयनयोस्त्ववस्य
माणत्वं त्वावाक्यांतरादर्शाद्ब्राश्रयोरीक्षितत्वाच्चो
द्देशेनैवोपि विजातीयानेकोद्देशकत्वान्न वाक्यभेदः
कालस्य चानुपादेयत्वेनोद्देश्यत्वेपि विधेयत्वादयन
सः अतस्तत्कर्तृतासंबंधेन ब्राह्मणत्वादेर्निमित्ते
आधानाद्युद्देशेन वसंतादिः कालो विधीयते तेन
ब्राह्मणादेः कालांतरनिरूपितब्राह्मण्यनिमित्तस्य
वसंतादेरनियतकालकत्वं सिद्धं भवति अथ उक्त
त्वविधिभिः सर्ववर्णसाधारण्येनाधानोपनयनादे
पवत्सर्वकालसाधारण्येनापि संक्रियते नहि क्त
त्वविधिभिराद्वेपयदेपि सयाज्ञादिवत्प्रयोगांतः
पाती स इति शुध्यते: अग्नीनामंते प्रतिपत्तिविधा
नेन तत्साधनस्याधानस्यापि तत्साधारण्यत्वा
पत्त्या प्रयोगान्तर्वत्क्रियेवानियतकालकत्वमग्नेः
उपनयनस्य त्वध्ययनार्थत्वेन सामर्थ्यादेव प्रयोग
वहिर्भावः अतस्त्वाग्निरोह्यादि प्रयोगद्वैभावितया
अनियतकाले प्रसक्तयोराधानोपनयनयोर्वसं
तादिकालकत्वे निमित्ते ब्राह्मणादिकर्तृकत्वं वि
धीयते एवं चोपहतयोगः प्राप्स्यमित्याद्युद्देश्येन ल
त्वालमिति न्यायाद्वसंतादिकालस्य निमित्तताप्राप्य
प्याउपपन्ना भवति ननु लंबवसंतातिरिक्तहेमंता
दिकालकस्याधानस्य ब्राह्मणाद्यनियतकर्तृकत्व

कौ हि २५

सिद्धिः सवैय्यानोभयविशिष्टाधानोपनयनविधिगौ
रवादन्यतः संभवत्याप्तिकत्वाच्च । ननूपनयनस्यमा
मर्थ्यादध्ययनजनकत्वे विनियमेनानाध्येयादिविधि
ष्ययतोपपत्तिः आधानस्य तु दृष्टरूपाहवनीयादि
जनकत्वेन विधिं विनापदेष्यवगतमिति कथं नत
द्विषयत्वं किं वाधानविध्यभावे आहवनीयादिपद
र्थोपवानवगतः नत्वसौ लोकप्रसिद्धः पूर्णादिवदाधा
नजन्यादृष्टविशेषवत्तु विधिं विनाऽप्रसिद्ध एव । अत
आहवनीयादिपदार्थस्सैवाप्रसिद्धे आधानजन्यत्वस्य
स्वतरामप्रसिद्धेः कथं कामश्रुतिभिस्तदाक्षेप इति चे
न्न । पवमानएवोपनयनेगुणसंक्रान्त्याक्तिना
विधिनानैमित्तिकविधानोपपत्तेः आधानप्रामोस्तुय
तेते नत्वपार्थसारथिमतावत् नत्वं गार्हपत्यमाद
धातिदिवाहवनीयमिन्यादिवाक्येषु आधानानुवा
देनतत्क्रादिरूपगुणविधायकेषु आहवनीयादिज
नकत्वेनाधानानुवादान्यथाप्तिः इष्यते चानुवादतो
विधयर्थप्राप्तिः नगिरागिरेति ब्रूयादिति निषेधानु
वादबलेन इरापदस्य गिरापदकार्यकारित्वप्राप्तेरे
वीकारात् अवश्यं चैवं सत्तादिवाक्ये चाधानविधिवा
दिना विनाहवनीयादिपदश्रवणात्तज्जनकत्व
माधानस्य अग्निपदस्य वा तत्सर्वापत्तेन क्रादिवाक्ये
ष्वनुवादमप्येवावगन्तव्यं ततश्च समाप्तिनत एव
प्राप्त्युपपत्ते शिष्टिमिन्नार्थे श्रवणमिति

तत्र अनुवादतो विशेषप्राप्त्यंगीकारे विशिष्टवि
धिमात्रोच्छेदापत्तेः इतरपदस्थलेन विकारार्थत
द्धितेनानियतानेकपदविकारवत्पर्यायान्नियता
नेककार्यकारित्वप्रसंगोऽनुवादत्वेन नियम
मात्रं न त्वपूर्वावगतिरिति चेन्मैवं सिद्धान्तेऽपि वपरं
तरसामानाधिकरण्यादिवदनुवादोऽपि उत्पत्तिवा
क्यगतानाग्निपदस्याहवनीयादिनानार्थग्राहकत
यानविरुध्यते भवदेवत्ताप्राहितोऽग्निराहवनी
यइत्याद्यर्थवादवशादाहवनीयादेराधानजन्यता
वगतेरित्याहुस्तदपि वस्तुमात्रेणैतस्यायमवदविधि
सद्भावेऽर्थवादोन्नीतविधिकल्पनस्यान्याय्यत्वा
दुपेक्षणीयं अतएव परिहृतो यं यद्यपि विशिष्ट
विधिगौरवभियाग्न्योर्विधिराधानस्य प्रयोजकतया
संभवति तथापि तुष्टीकोक्तरीत्या संभारेष्वग्निना
दध्यानीत्यपेत्यग्निनाविविक्षयाकिंवादाधानविधा
पकसंभवत्येव तस्यात्र संभारविधिः तेषां वादीप
त्थिवानां वाक्यांतरप्रमितत्वात् नापि तेषामाधा
नाधिकरणता विधिः तस्याप्यसामर्थ्यात्तस्मि
न्नाधीयतामित्यादिमंत्रवर्णेनैव प्राप्तत्वात् एतेना
धिकरणता विशिष्टाधानविधिरित्यपास्तम् यथा
कृत्तिकासु प्रकारोऽपि प्रतिवंद्यायतेः यथाकुः तत्रा
हिनक्षत्रादिवाक्यमात्रायत्त इति वदीदीक्षते एव अ
तोऽत्राधानमात्रे विधीयते तस्य च प्रयोगः प्रयाजादि
वत्प्रधानविधिरेव प्रयोगास्याप्यन्यतः संभवत्यामि

कस्य विधानेगौरवात् प्रयोगविधिविरुद्धस्य कालल
वर्ण्यादेरभावाच्च अत एव व्रीहीन्प्रोक्षतीति वक्तव्यति
विनियोगस्थानेन क्रियते अत्रत्यापिपदे च गुणवाक्या
नुसारादाहितोऽग्निराहवनीय इत्यादौ वाक्यभा
ष्यभेदेनाहिताग्निपर्यायाहवनीयादिपदे अतोऽन
न्यादिवत् विधिशक्तिकसंभावकवाक्येनैवाधानस्ये
यमस्य विनियुक्तस्य च कल्पविधिभिः सर्वसाधारण्ये
न प्रयोगविधानात् ब्राह्मणादिश्रवणं निमित्तार्थमेव
न चैवं संभावकवाक्ये पदसमपदनिर्देशादनाधानारेव
स्याहवनीयत्वाभावाद्वगीतत्वेना हि मानाम पिकप
णानामस्याहवनीयसंभवे नतत्स्यादिति फलकर्म
यावत्मात्रसंबन्धि तद्रूपात्मनेपदार्थसापि वसंता
दिवाक्ये विधानाद्धाकामेशपतिः उक्तानावत्लवत्
इत्यादौ अकर्तृगेऽपि क्रियाफलदर्शनेन कर्तृमात्र
ह्रीफलकत्वस्यात्मनेपदार्थत्वाभावात् अत एव
स्वरितञितः कर्त्रभिप्राये क्रियाफल इत्यादिस्मृतिर
पि प्रयोगविरोधादुपलक्षणत्वेन व्याख्याता अथ वात
हि स्वत्वात्मनेपदस्य क्रममेवानन्यादि शक्तिकंपए
वं विहानग्निमाधत्त इत्याधानोत्पत्तिविनियोगपरवा
क्ये तेन वाधानमात्रे संबंधितस्य आत्मनात्वसंतादिवा
क्येन वाक्यभेद इति सर्वथा निमित्तार्थतया ब्राह्मणादि
श्रवणस्येति सिद्धमभिधीयते। नैतदपि निमित्तार्थत्वं
न विधिरूपनयनस्य नाव निपमेनानावत्वाद् तेहि
ज्ञानस्य पद्यापि नियमेनादोपकारकत्वापितत्साधन

स्याध्ययनस्यनियमेनाक्षेपकाः उपाकंतत्वेणाविनत्वसं
भवात् अध्ययनमपिचोपनयनस्यनियमेनाक्षे
पकं अनुपनीतस्याप्यधीतत्वसंभवात् अतःपरत्वेसंभ
वदप्राप्तिकस्योपनयनस्यवसंतवाक्येसंभवन्नवविधिः
नचगुणसंक्रान्तशक्तिनाविधिनाप्राप्तमेवोपनयनं
भाव्यतयोद्दिश्यनैमित्तिकगुणविधिसंभवेद्विशिष्ट
विधेरत्याप्यत्वमितिवाच्यं उपनयनविधेरध्ययनवि
धेश्चनित्यवच्छ्रवणावगतनित्यवद्वाक्यैकवाक्यता
भंगेनविशिष्टविधेरङ्गीकारात् किंच ब्राह्मणका
लयोःकस्यनिमित्तत्वंकस्यविधेयत्वेत्यत्रविनिगम
नाविरहादुभयविशिष्टोपनयनविधिः नचप्राथम्य
नियामकंतस्योद्देश्यताबोधकत्वव्यवस्थाया उपप
दविभक्तित्वप्रसंगेनविधेयताबोधकत्वस्यापिसंभ
वेनानियामकत्वात् अनेनैवचाध्यापनवाक्येविशि
ष्टविधिर्द्रष्टव्यः किंचसंभारवाक्येआधानोत्पत्ति
गीकारेप्यात्मनेपदार्थस्यासामान्यादृसंस्कारादिवाक्ये
वाक्यभेदप्रसंगः नचोक्तानान्तत्ववत् इतिप्रयोगात्क
र्त्तृमात्रश्रुतिफलकत्वस्यनात्मनेपदार्थत्वस्येतिविवे
चेनव्याकारिकप्रयोगस्यार्थविवक्षितापासाधुत्वमात्रार्थे
त्वेनस्तोत्रक्रियाजन्यदृष्टिणलाभरूपफलाभिप्राये
णोपपन्नत्वात् विहृत्ताकस्यवाधानोपांदकत्व
वर्त्तमानापदेशत्वाद्यशास्त्रोपवेधाद्विध्यंतरार्थवाद
त्वाश्चाधुत्वमेवः ईदृशहिपवेसपेत्रभान्यामवर्तिमह
तद्दणर्थवादसहितमपिअपउपसृजतीत्यादिवि

येषु विधिविहितानामुदकादिसंभाराणामप्यसं
भारास्मरतीति यः स्नानाचमनस्थापनविधिस्त
स्येव यो विहितोनेवमुदकादिस्थापनपूर्वमग्निमा
धत्ते तस्य स्थापनरूपांगसामर्थ्यात्सहायसंपन्नमपि
वैगुण्यं तेनरहितं कृतं तदयत्न्येवादेन स्थापनप्र
शंसा अतो आधानप्रापकाभावादहस्तनादिवाके
आधानसंवेधिन्यपि विधिलिङ्विधिवत्त्वमेवसोऽपि च
नोत्पत्तिविनियोगयोरेवः कर्तृकादिरूपाणां तु
णां नामनत्वप्रसंगेन प्रयोगस्यापि अतएवा
धानोपनयनयोस्तु विधिप्रयुक्तयोरेवलाभात्तु
विधयोऽपि तयोस्तत्कार्ययोर्वा न प्रयोजकाः तद
धिकारिणामेव चत्रैवर्णिकानामधिकारिणां
भावश्च स्नानाद्यधिकारित्वकल्पनं श्रयणाग्नि
वि पापाहेपरस्यादिलाघवमपि नचाग्निविद्य
यास्तु स्वविधिप्रयुक्तत्वेऽपि निष्पन्नावेदकप्रमाणा
भावेननियमेन करणानापत्तेस्तदा निसक्तं तु
विधिमिस्तदावेष्याव्यणकपद्धतिवाच्यमित्या
नामपि क्रतुविधीनां लाघवेनपरप्रयुक्ताग्नि
विद्योपजीवित्वप्राप्तिनेस्वविधिसिद्धाग्निविद्या
वतस्तदकरणेप्यस्वाधीनत्वावधिनिद्दहितत्स
न तु त्सैप्रमाणाभावेनाग्निविद्यादेपाकत्वात्तु
पपत्तेः एतेन क्रतुविधीनां नित्यत्वाद्याधानादि
विधीनामपि फलेतो नित्यत्वमिति पार्थसारथ्यु
क्तिरपास्ता वस्तुतस्तु नधीयानाश्राप्ताभवंति

स्याग्नृयं भारद्वाजः किलायमधीत्य वेदं न विजा।
नाति योर्थं अस्य च तत्र विशेषकालश्चापनापनिकाय
रः अतऊर्ध्वपतनत्येतत्र्यमाहिताग्न्यध्ययनत्वानोपन
यनानामानाहिताग्निश्रीयेनेत्यादिश्रुत्याव्याधान
स्य च ह्येयोग्यं वनिमत्तमिश्रं न ह्रीयेष्कृतिरनाहिता।
ग्निमरणास्यातस्तत्र कर्तव्यप्रायश्चित्तानधिकारे पराह मा ३
श्चेत्याहिदंशाप्रायश्चित्तत्वदिति वाच्यं तस्तत्र कर्तव्य
प्रायश्चित्तस्य विधिप्यानानाश्रोतत्वात्तथात्वे अनाहिता।
ग्निनाधानोपपातकेषुणाध्ययनेष्वतदेकवा
कानयपमविष्कृतिराधानावपणकानपेरेव अत
श्चाधानोपनयनयोनित्यत्वाचनित्यकृत्योतदहं ह
पकवप्रसक्तिरितिलाघवं अतः कर्तृकालविशि
ष्टत्वनितविनियोगपूर्वकः प्रयोगप्रौढ्वसमनाहि
वाक्यैर्विधीयते नचवचसमनादिवाक्येष्वाधानप्रयोग
विधिसंभवेपितिअत्रविनियोगयोःसंभारविधिवल
नाधिकाभिसंभवाद्विधानमितिवाच्यं तथात्वेश्रा।
ल्लेनेपदार्थस्याधानत्वेतिफलकत्वरूपमेतत्तेनेवि
नियोगवाश्रवयप्रयोगपरश्रामानस्याप्यन्यवाद्वेनवि
धिश्रामाह्यणादिविशिष्टप्रयोगविधिश्चेतिवेशिष्ट्या
संभवाद्वाक्यभेदापत्तेः संभारवाक्ये श्रुतिग्निमाद्धाती
त्येताव तत्रैवात्तविनियोगपरत्वसिद्धेः संभारेषु र स
स्यैवयार्थ्यापतेश्च अतएव तत्र तस्मिन्नाधीयतामय
मितिमन्त्रवर्णोत्सभवत्यामिकायाश्चापिसंभाराधि
करणनायाअभ्युदयपरिष्कृतार्थविधि अतश्चवि

ष्वपि ब्राह्मणादिवाक्येषु प्रयोगवत्त्वमिति विनियोग
योरपि करणत्वप्रयोगभेदवदाधानस्वरूपस्यापि भेदः
अस्तु वा मा परस्य ब्राह्मणवाक्यपर्वोत्वति विनियोगवि
शिष्टयोगविधिः राजन्यादिवाक्योक्तप्रयोगान्वयि
कर्तृकालरूपगुणयोगात्प्रयोगभेदमात्रं अतएव
तत्र कर्तृकालविशिष्टः प्रयोगएव विधीयते आत्म
नेपदार्थस्तूत्पत्तिवाक्यप्राप्तोऽनूद्यते सर्वेषां ब्राह्म
णादिश्रवणानि निमित्तार्थानीति नन्वेवं संभारवाक्यादि
नोत्पत्तिविनियोगप्रयोगाणां प्राप्त्यभावेऽपि ज्ञातपुत्रः
कृष्णकेशोऽग्नीनादधीतेति वाक्येन वयोवस्थाविशे
षायत्र कर्तृविशिष्टाधानविधित्वमस्तु अनेक
विशेषणविशिष्टविध्यपेक्षयाप्येकविशिष्टवि
ध्यंगीकारस्य न्याय्यत्वात् शूद्रादिसाधारणैकप्र
योगविधिसंभवे ब्राह्मणादित्रयस्य प्रत्येकप्रयोग
विध्यंगीकारानौचित्याच्च अतस्तत्तेनैव प्राप्तानां
ब्राह्मणादीनां निमित्तार्थं श्रवणमिति वक्तव्यं एवम
पि कर्तृकालयोः कस्य निमित्तत्वं कस्य विधेयत्वम
त्र विनिगमनाविरहानिवारणात् अतः सिद्धब्राह्म
णादिगुणस्य विधेयत्वाद्वैदकत्वमिति प्रयोजनं
स्पष्टमुक्तं आधाने तु लग्नादेयत्वादुपनयने च ब्रा
ह्मणादिश्रवणाच्च तत्प्रधानं आधानादि प्रयो
गभेदनियामकमित्यवगम्यते आधानादेः स
र्वेष्वप्यस्थेष्वनावश्यकत्वात् इति प्रकारमध्येष्वि
णव्याख्येयं ॥ २ ॥

कि मी ५५

अपनेगुणचोदनानां संज्ञोपबंधात् दर्शपूर्णमास
योर्दाक्षायणयज्ञेनयजेत प्रजाकामः साकंप्रस्था
य्येनयजेतपशुकामः संक्रमयज्ञेनयजेतान्नाद्य
कामइतिइतिश्रूयते तत्रकिंएवंसंज्ञाककर्मान्तर
विधिरुतदर्शपूर्णमासाश्रितोगुणोदाक्षायणादि
पदाभिधेयः फलार्थंविधीयतइतिसंदेहः पूर्वपक्षे
गुणस्याप्रसिद्धत्वादिनाविधेयत्वादनिश्चितवि
धेयताकस्यसिद्धेनगुणफलसंबंधायोगात्कर्मवि
भावनाभेदकत्वोपपादनात्संगतिः अत्रेन
यानुप्राप्तत्वाद्गुणस्याप्राप्तत्वेनविधेयत्वाद्गु
णाभेदकता प्रकृतेनगुणस्याप्रसिद्धत्वात्कर्थंवि
धिसिद्धस्यवहनमानाभावात्तमत्वाद्भावनाभेद
कत्वाभुपायदिर्पभेदएवायमत्तदासंज्ञादिभिर
वसेयइतिपूर्वपक्षोस्यानाततइच्छा अथाय
संगतिलक्षणैर्वदंद्रियकामाधिकरणसिद्धमेव
गुणफलसंबंधसाक्षेपसमाधानात्तदनेनैतेनरू
र्क्कतत्वदाक्षायणयज्ञादिपदानां समुदायप्रसिद्ध्यं
अवयवप्रसिध्याद्वा गुणविशेषेलोकेवेदवाप्रसि
ध्यभावान्नाप्रसिद्ध्यजिसामानाधिकरण्येनयागनाम
धेयत्वंतावत्त्रिरयवक्तव्यं अतएवयथासावर्णोपात्ताइर
तिपयसादाक्षायणयज्ञेनेत्यादिप्रसिद्धकर्मनामधे
यमवर्णपदसामानाधिकरण्यमविसंगच्छते अत्रार्थ
दाक्षायणपदवाच्यायाः प्रयोगावृत्तेर्ईशानपेक्षत्वेनप
योविधानानुपपत्तेः। अतस्याभिदादिसंज्ञावदेकत्र

कौ
हि
९

तथाकर्मान्तरचोदनैवद्रव्यान्तरप्रदानायणादि
पदानांकर्मान्तरेष्ववयवशक्त्यासंभवेपिरूढ्यैकल
तयाविजातीययागान्तरस्यैवस्वकल्पनावच्छेदकत्वेक
स्यतइतिनदोषः॥सू॥३सा९॥ अगुणात्तुकर्मचोदना॥
ननुनैदनामधेयं दाक्षायणादिपदार्थस्यगुण
स्यलोकेऽप्रसिद्धस्यापिवेदात्प्रसिद्ध्युपपत्तेः न
याहि दक्षस्ययजमानस्येमेदादाक्षायणिजसेलेषां
कर्तृमतानामयनेप्रयोगाद्दृश्यतेइतिदाक्षाय
णद्रव्यमेवयद्रव्यत्वमयनत्वसारेणावगतेकिंपतो
श्चाहुतिरितिविशेषापदायांहृपेणमासोहेत्र
मावास्येयजेतेतिवाक्यान्तराद्विराहुतिदाक्षाय
णपदाभिधेयत्वमवगम्यते तथासाकंप्रस्थाप्य
पदेनापिसाकंसहप्रस्थानंयत्रेतिश्रुत्यासह
प्रस्थानेवगतेकेनसहेत्यपेक्षायांसहकुंभी र
भिक्रामेदितिवाक्यात्कुंभीसाहित्यमित्यवगम्यते
एवंसंक्रमपदेनापिसंक्रमणोउक्तेकेत्यपेक्षायां
भवदेवोक्तविपर्यायाग्राहवनीयरूपेहोमदेशाइत्य
वगम्यते अतस्वलोकाप्रसिद्धत्वेपिवैदिकप्रसि
द्धिमात्रेणदाक्षायणादिपदानांगुणवाचित्वो
पपत्तेःइष्यादिवद्गुणफलसंबंधोत्पत्तिरूपवत्वेनिवे
त. नेहपौर्णमासावास्यादिवाक्यानांप्रकरणात्के
वलतयाहित्वादिद्रव्यगुणविधायिकत्वेदाक्षायण
दिपदार्थानानत्वपेयाहकत्वानुपपत्तेः अतएवदक्षा
कसैलेनीत्यस्यापिअग्न्यग्रयणामावपरत्वोपपत्तौकर्मा

गत्वाबोधकत्वानुपपत्तेः अथ तेनेनक्रत्वर्थत्वमेव
हि तद्विधावपि श्रयणपदवाच्यस्याश्रयत्वेनाप्रमा
णाभावाद्वाधिकायाः प्रसक्त्याभावाद्वित्वपदवत्पर्थव
त्त्वानोपपत्तेः फले विधानमित्युच्यते ततो गुणधात्वर्थ
योरुभयोरपि नित्यवत्त्वाभावे द्रव्यावयवायान्नरद्वीया
यथ्यार्थं प्रजाः कल्पेरन्निति वृत्त्वा वाथांधिकरणन्याये
न धात्वर्थस्येव फलसंबंधोपपत्तेर्न गुणफलसंबंधो
पपत्तिः इत्यादौ नित्यवदनुवादाद्योगात्तत्संगीकारवृत्ति
वैषम्यं किं च दैपोर्णमासाविष्टेनापि पौर्णमासादि
पदवाच्यप्रधानत्रयमात्रानुवादेनैव हि तद्विधानात्प्रक
रणेन च तस्यैवाश्रयत्वावगतेन सांगप्रयोगावृत्तेः फ
ले विधाने शाकलेनेव विवक्षितगुणस्य चदर्शनायणादि
पदेनैव सकृत्प्राकृतानां पदैव यथापत्तिः साकं प्र
स्थाय्येन प्रस्थानसाम्यात्करणाद्विधिनैव यागसमुदाय
मसाहित्यमेव श्रुत्या नाश्रितं विधेय न च प्रस्थानस्य
प्रणयनादिवद्दवांतरप्रकरणमस्ति सात्राप्यस्य तु
न कालेपि साक्षादयोगयत्वमिति नाश्रयत्वं संक्रमस्य
तु आश्रयत्वनीयाधिकरणकृष्णोमविधिनैवार्थान्तेषा
तु भयसामोमाभावार्थाधिकरणन्यायेन धात्वादेव फलो
पपत्तेर्न गुणफलसंबंधविधुपपत्तिः एवं च गुणवो
दनासंभवेन विधेर्गुणसंक्रांत्यशक्तिकत्वाभावात्तद
ध्याभावन पौरेव चोदनाप्रतीतेरभ्यासादपि भेदसि
द्धिरिति सूत्रार्थः न च फलसंबंधपरत्वसंभवेनाभ्यास
स्वरूपाभावात्कथं भेदसिद्धिरिति तत्राह ॥ समासेच फले

र्थं सर्वभोदर्शपूर्णमासाविस्यनेन फलसंबंधस्याभि
प्रायत्वादनन्यपरत्वमाहतमेव अतोऽभ्यासादधिक
र्मभेदसिद्धिः अथवा फलस्यानुपादेयस्य सत्वात्प्रक
रणांतरन्यायेनापि भेदसिद्धिः नवसाविधानानुपप
त्तिः संज्ञया विच्छेदोपपत्तेः संज्ञा हि कर्मांतरबुद्धिज
नयत्यपि पूर्वबुद्धिविच्छेदमपि तावज्जनयति अतस्त
द्वैयर्थ्यं अनुपादेयस्य सहायेन प्रकरणांतरस्याप्युपपत्तिः
अतो वरं संज्ञाभ्यासप्रकरणांतरैः कर्मांतरमेव न
गुणफलसंबंधः एकैव फलप्राप्तेः क्रियैकजन्यत्व
स्वभावोऽयमगृहीतो भवति अतो नावगुणस्याभाव
नाभेदकत्वं विकारो वा प्रकरणात् भेदकं कर्मांतर
विधानं भेदप्रमाणस्यैवासिद्धेः नाप्यवदभ्यासः प्र
कृतस्यैव कर्मणः फले विनियोगसंभवेनोप पद
भावे पिष्टभ्यासासंभवात् न च सार्थक्यमवाकेन,
तव्यासिः तेन तत्संभवेऽपि दर्शपूर्णमासाभ्यां स्वर्गका
मोपजेत इति वदभ्युदयशिरस्कतार्थमनेनैव तद्विधिसं
भवात् नापि प्रकरणांतरन्यायसंज्ञासंयुक्तस्यैव क
र्मणः सन्निहितत्वेन तदभावात् न च संज्ञया पूर्वबु
द्धिविच्छेदः सादीनां स्वरूपाकांक्षानावच्छेदकविधेयता
वच्छेदकमात्रोल्लेखकत्वेन कर्मांतरबुद्धिजनकत्वे
पि पूर्वकर्मबुद्धिविच्छेदकत्वाभावात् नहि तेषां भे
दानुपजीवि पूर्वकर्मोपस्था
पकप्रमाणाभा
व॥

प्रकरणांतरस्वतन्त्ररूपं तत्कर्मीकारणं वा तथात्वेन
नूनपातादियागेनतराग्रानाभिक्रमणस्य समिधांगा
गत्वानापत्तेः अपितु प्रकरणांतरस्यैवमतः अतएवत
त्रनात्रएवातिदेशार्थपूर्वकर्मोपस्थापकत्वाङ्गेदानु
पजीवीतिविशेषणं अतस्त्रप्रकृतेएवंबुद्धिविच्छेद
काभावात्प्रकरणस्य चपूर्वोपस्थापकस्यसत्वात्रप्र
करणांतरन्यायेनभेदः अतएवोद्भिदापजेतेत्यादौ
संज्ञयैवभेदोवर्तिकेउक्तो नतुप्रकरणांतरात् प्रकृ
तेतुसंज्ञायाभेदकत्वमत्रनरस्य वैतिगणकविषयामः
अतोभवदमाणरीत्यादाक्षायणादिपदवाच्यस्याहु
मादेर्गुणस्यैवनित्यगुणाविकारतयाफलार्थत्वेनवि
धानं तर्हिवाश्रयत्वेनप्रकृतत्वस्वतत्वयोकर्थभावाकां
क्षालक्षणप्रकरणानुग्रहाभावेपिश्रुतिकारान्मक
प्रकरणानुग्रहोभवतिइतरथाननुग्राधाश्रुतिः ॥ लिं
गदर्शनाच्च ॥ त्रिंशद्वर्षाणिजीर्णोदर्शपूर्णमासा
भ्यांयजेतपदेदाक्षायणयाजीस्याद्दर्शपिंचदशो
ववर्षाणियजेतात्रैवंदेषासंपद्यते हि पौर्णमासे
हेंअमावास्येऽजतइत्यत्रयावज्जीवपक्षानुकल्पत्वया
त्रिंशद्वर्षपक्षस्यात्कांतदनुकल्पत्वेनापिदाक्षायणाया
जिनःपंचदशवर्षपक्षमनुपदिश्यतदर्शनादेतावते
वत्रिंशद्वर्षसाध्यप्रयोगानिरुच्यमानात्राहुतेःफला
र्थत्वमेवशब्दते तदाहिगुणवाक्येपौर्णमास्यादिपद
वाच्यप्रधानमात्रसंबंधित्वेनश्रुतापिहिराहुतिःफल
वाक्येदर्शयजमानसंबंधित्रिंशत्विकसंबंधित्वेनश्रुव

णात्‌ दर्शपूर्णमासप्रयोगात्प्रतिनिविष्टापते अ
तश्च फलार्थमपि सत्तत्फलकेकंकामेन नाली
पन्यायेन पंचदशवर्षपर्यंतं हि साहत्व दर्शपूर्णमा
सप्रयोगानुष्ठानेन तावतैव त्रिंशद्वर्षसाध्यप्रयोग
संख्यासंपत्तेः पंचदशवर्षप्रवलस्तुतिरूपपंत्राभ
वति कर्मांतरत्वेन साध्यक्रत्वेन ज्योतिष्टोमविकार
त्वात्‌ दर्शपूर्णमासविकारत्वेपि वा पंचदशवर्षसं
तमात्रत्वावेवप्रमाणाभावः नचातिदेशेन पंच
दशवर्षकालीनावृत्तिप्राप्तिः पंचदशादिवाक्ये
श्रुयावज्जीववाकाव[illegible]मितिकप्रयोगस्यैवगुरुषा
ध्यस्य विधेयत्वेन तस्य तद्दैव विकृतावनतिदेशा
त्‌ नत्वेवं पंचदशवर्षकालस्यैव पौर्णमासमावा
स्यावच्छिन्नस्य जीवनवन्निमित्तत्वापत्तिः अतश्च
यथैव पौर्णमास्यावच्छिन्नस्य वसंतस्य निमित्तत्वे तस्य
कत्वादेकस्मिन्निव संतेसदैव ज्योतिष्टोमकरणं नि
मित्तावृत्तौ चावृत्तिः तथा पंचदशवर्षकालस्यापि पौर्
णमास्याद्यवच्छिन्नस्यैकत्वादेकवारमेव दर्शपूर्ण
मासप्रयोगस्तदावृत्तौ च पुनरावृत्तिरिति मानुयात्‌
जीवनानुवृत्तिपर्वेभिन्नत्व युक्ताप्रयोगावृत्तिवि
तिर्वेद्यम्‌ अतो यावज्जीवाधिकरणपूर्वपक्षन्याये
न तावतैकालं दर्शपूर्णमासावृत्तिरेवकर्मांगत्वे
न विधीयत इति कर्मांतरेपि तस्यात्रातिदेशो युक्त
एवेतिचेत्‌ । न । अथा[illegible]वहितोत्तरकालीनपं
चदशवर्षत्वादेर्निमित्तत्वेपि निमित्तपर्याप्तसंतसंयो

गताविहितोपयोगात्तदनुष्ठायकत्वरूपनिमित्त
तावगतेर्वसंतेत्येवमादौ अत एव निमित्तस्यासा
नत्वानुष्ठाने प्रसक्ते आहारविहारादिवशेन त
हाप्याज्ञानेऽपि मासाग्निहोत्राभ्यायेन पौर्णमास्यायनुग्रहे
पि सातत्वस्यासंपत्तेर्बाधायोगात् पुनः पुनरनुष्ठानोप
पत्तिः प्रमाणांतरावगतायामावहितोन्नरत्वबले
न च न प्रचदेशावर्षांतरे पुनः करणापत्ति अतस्मया
वज्जीवाधिकरणसिद्धान्तन्यायेन निमित्तपरत्वेऽसेवो
पपत्तौ नाश्रद्धेः कर्मांगत्वेन विधिरिति पुनरुक्तार्थस्य
नैमित्तिकप्रयोगस्य विकृतावतिदेशात्कर्मांत
रस्यापि चदशवर्षपर्यंतमावृत्तिः न च भवन्मतेऽप्य
फलार्थस्यापि कर्मान्तरस्य कालकनालीपन्यायेन प्रव
दशावर्षपर्यंतमावृत्त्युपपत्तिः तथात्वेपि हिंसादि
नो प्रमाणाभावेन विशेषस्योपपत्त्युपपत्तेः यदि त्वपूर्व
पदे कर्त्रर्थत्वेन हिंसावृत्तिविधेरिष्टत्वात्कर्मांतरे
पि हिंसावृत्तेः आमिक्षान्तरवाजिनशावृत्तिपदस्यापि
हिंसावृत्त्यैवानुष्ठानापत्तेः स्वतंत्रस्वतन्त्रत्वोपपत्तिः अस्तु
वा कर्मान्तरस्यापि शावृत्तिसाध्यप्रयोगांतरत्वेकप्रयोग
त्वेऽपि कथं तावद्दशपूर्णमासयागांतरेपि च दशापत्तिरस्तु
तिरधिकरणत्वात् अतो लिंगदर्शनादप्यावृत्तिरे
व फलार्थे विधीयते गुणात्स्त्रोपबंध यत्स्तया
संक्षेपबंधाभेदहेतुत्वेनोक्तसगुणविधिवादा
नापणादिपदानामसिद्धिः यद्यपि वगुणेन लो
के प्रसिद्धत्यागकण्डूकाण्डा दिवहाकांतरप्र

सिद्धएवदाहाद्यण्णादिपदवाच्यत्वेनशुक्रःसमाश्र
यित्वेवसत्त्वंनस्तुएवौक्तविधयालौकिकावयवप्र
सिद्धैवदाहाद्यणादिपद्यनामाहूत्यादिकाचिवे
अतएवदाहाद्यणवाक्येऽरुतिकसंबंधानीयाह
त्तिरेवफलार्थविधीयतेःनसाक्षादङ्गयागेद्वयोर्विधे
यसामर्थ्यसहकृतत्रक रोनएणामासप्रयोगएवा
श्रयत्वेनसंबध्यते गुणाश्रयपोश्चनान्तंतेदध्यादिव
द्वेदइतिसहवनार्थमेवयजत्रशह्ःसमासेव नसुप
वैपदांसंज्ञायामगाङ्त्यनेनगाकारवर्जिनएवंयदनि
मित्तकेणत्वंसंज्ञायामेवविदधतासंज्ञात्वाभावेणत्व
स्यैवानापत्तेर्यद्यपिसंज्ञात्वमावश्यकंतथापिश्रव
यवार्थप्रतीत्यायोगरूढ्यंगीकारात्संज्ञात्वेपिश्राह
त्तिविधौनकिंचिद्बाधकं एवंचसत्रमध्यांजेसनंस
गच्छेतः आहुतिमत्रकियतीतिविरोधापेक्षायांपौर्ण
मास्याविनिवाकोनहिवविधिःअतएवायेतितविधा
नाहिवमपितत्रकण्ठकयंभावेनगृह्यते साकंप्रस्था
य्याकेपिअवयवप्रयुक्ततविधेघणीभूतमांसहवैमे
वफलोद्देशेनविधीयते ननुप्रस्थानमपितत्सतिप
प्रयोगेपिहोमार्थंप्राप्तत्वेनकर्मवदविधेयत्वात् स
हत्वस्यचाश्रयापेक्षायांवाक्यांतरेणआज्यभागाभ्यां
प्रवर्ग्येणेयेनचपुरोडाशेनाग्नेयेस्यचैवसदायसह
ऊंभीभिरभिक्रामेदित्यनेनाभिक्रमणंसान्नाय्यहो
मांगभूतमाश्रयत्वेनसमर्प्यते अत्रहिप्रकरणाद्वि
धेयसामर्थ्याच्चसान्नाय्यहोमांगभूतात्याक्रमणापर

पर्य्यायाभिक्रमणानुवादेन कुम्भीसाहित्यमेवाश्रयि
तासंबंधेन विधीयते प्रकरणान्तु मितवाक्य इव हो
मानुवादेन द्विपितियातोपसर्गाणां च परस्परान्व
यस्तुत्वत्र वाचवाच कुम्भीतत्साहित्ये चेत्यनेकविधा
नद्रुतवाक्यभेदोपि कुम्भाभिविविनिव द्रुवचनेत्र कर
णान्यपोह्यो भवतीत्येवं हि बलवणार्थसदनुवा
दः कुम्भीनाञ्च साङ्गयोगत्वादभिक्रमणमपि तद्धोम
साधनमिति चैव विधेयसामर्थ्यादेवगम्यते अतएव पु
रोडाशप्रचारोत्तरकालत्वादनुवादः क्वचामधोधा
रणस्येवोत्ववदानानापि निषिद्धत्वाद्योग्यतयैवात्म
से[illegible]कर्मकरत्वादाश्रीयेतानमनूद्यते श्र
तस्य प्रस्तावस्य प्रणयनादिवद्दर्शानन्तरप्रकरणा
भावेपि वाक्येनैवाश्रयत्वेनानुपपत्र सहत्वस्यवाधि
करणपेक्षाया कुम्भोत्वपि तेनैवलभ्यन्ते इति न किंचि
द्रनुपपन्नं एवं सक्रमत्वाक्येपि लोकस्य सिद्धेवसक्र
मणेफलार्थं विहिते किमर्थं क्वेन्यपेक्षायामेव देवलि
त्वेनाश्रीतत्ववचनवशेन होमार्थमाहवनीयदेशरूम
वगम्यते न चतस्य नित्यवत्त्वामत्वात् प्रक्षेपवाग्रान
ग्रहानुग्रहीयाद्यः कामेवतयथा पूर्वेप्रजाः कल्पेर
न्निति विकल्पपमोमे [illegible] फलसंबंध एव शुक्रइति श्रा
का तद्विहितभयोः स्वरूपेणानित्यत्वमामिवत्फलसंब
न्धेनापि [illegible] भावाद्योपिकरणन्यायेन कि
याफलसंबन्धःप्रकृतेन हयोः स्वरूपेणाप्यामिवदवाद्य
फलेपि [illegible] तत्वे काम्यत्वाक्येन यामत्वाद्यामगु

कौ
द्वि
२३

णाविनियोगएवविधिसंक्रमणात्तुक्तइंद्रियकामादि
करणन्यायेनगुणफलसंबंधइतिनसंक्तोपबंधस्य
भेदात्तत्समाप्तिरविशिष्टा ॥ यत्तुक्रियातत्वफल
प्राप्तिर्द्वारेणगुणादिसंक्रमेतत्तृणाद्यपिदध्यादेःफ
लप्राप्तिरविशिष्टैवइष्टेतिनकिंचिदनुपपन्नंतत्स्मा
द्गुणफलसंबंधस्थलादौक्रतुगुणभावनाभेदक
त्वप्रयोजनेस्पष्टं । तत्कारणाश्चप्रकरणोक्तमेवाहु
स्तात् अनारभ्याधीतेवाय्वन्तेनमालभेतभूतिकामः
सोमेंद्रंचरुंनिर्वपेद्ब्रह्मवर्चसकामइति तथादर्शपूर्ण
मासयोरीषामालभेतवत्सेषुणीतिद्वेपदितिनत्व
किंवादर्शपूर्णमासिकेषालंभवत्सेषुशिष्टिनिर्वापानुवा
देनद्वैरवर्वादिगुणविधीयतेउतनवादबद्धान्वयाल
भनिर्वापहोमकर्मान्तरेगुणफलयुक्तेउतयागत्वेप
इतिसंदेहःअनिश्चितविधीयमानाकस्माद्देवतादेर्गुण
स्यभेदकत्वविचारान्यायसंगतिः प्रावध्यमत्र
यद्गुणमात्रविधानस्यहवींषिकरणोक्तस्यापवाद
देनेतरसंगतिःतत्रगुणमात्रविधिसंभवेविशिष्टवि
धिगौरवप्रसंगात्कल्पनस्यचान्याय्यत्वाच्चतच
वीदिगुणस्यवोपादेयत्वेनहरस्यालेभानुवादेनवि
धानाद्दवनीयेजुहोतीवत्कविधानेभावप्रवात्स्वीय
करणन्यायेनाज्यादिगुणमात्रविधानेनचफलस्या
नुपादेयस्यकर्मान्तरत्वोपपत्तिःअनुपादेयान्वयस्य
विधेयस्यैववदसमानगत्याप्रकरणान्तरन्यायोपपत्ति
नैवप्रकृतेतद्भावेनाभेदकत्वात् प्राप्तमावदर्शपू

र्णमासिकप्रयोगालंभनिर्वापयोः सार्वकाम्यवाक्येन
प्रयोजकत्वात्क्षोभनादिफलसंबंधः अतो भूति॰
कामादिपदमनुवादो यतो लेवणपालंभनिर्वा
पविशेषपरत्वतात्पर्यग्राहकः अतएव होमस्य वि
हितत्वश्रुतिर्द्वैनैकसाध्यत्वेन लोकेऽभावात्कल्पं
तदनुवादेनाहवनीयविधानमालंभादेस्तु लोके
पिसत्वेन हिरण्ययाचणावदानो पौर्णमासिकस्यैवा
नुपस्थितेर्नैतदनुवादेन गुणविधिरित्ययास्तया
वतोऽप्राप्तत्वात्तिरस्कृत्य कार्पादिनात्र विधिरूपतात्पर्यग्राह
कानुरोधेन यागोत्पैपसानलत्वतत्वस्य कृतेपिफ
लपदतात्पर्यग्राहकानुरोधेनैव यालंभादिलक्ष
कत्वोपपत्तेः नैवं समध्येन कगुणप्रवणगुणाक्र
मोत्तरत्वापत्तेः एकस्यैव गुणस्य विधेयत्वेन विधेय
गुणाभावेन तदनापत्तेः आलंभानुवादेन हि हिरण्य
यांश्चेत गुणमात्रैकत्वतया विधीयते वायव्य
पदं तु सर्वैव वनस्पतीनामग्रस्थेवात्तोवायुदेवता
कत्वसत्त्ववादीधारणपरत्वेनानुवादः निर्वापा
नुवादेन च चरुमितिपदेन लक्षणया स्थालीश्र
पिकरणत्वेन विधीयते ऽप्राकरणिकश्चोत्तरसूर्यभाव
रोपाह्नवरुमुनिपदिकेन स्थालीपरिमितत्वलक्ष
णया विधीयते पंचशरावमोदनमितिवत्स्था
लीपरिमितव्रीहिजातस्यैव चरुमितु शिमिनिर्वापो
पपत्तेः सौर्यमिति चाग्नेयस्यैव देवतास्पतेनो देवताव
सामान्यादनुवादः अथवा आलंभायनुवादेन वा

यादिदेवताविधिरेव ग्रहणाद्वैन्द्रवाय्वादेः श्रौतत्वेन्त
वाधाहोत्रजचमसप्रायिकत्वाच्चकृत्स्नायनकत्वाच्चा
नुवादे अथवा वायवादिदेवतासंबंधस्योत्पत्तिशिष्ट
त्वाच्चरुत्वाग्नेयादियागोपयायत्वानुपपत्तेः फल
पदस्यावश्यानुरोधेन च फलोद्देशेन श्वेतत्वेन गुणो
विधीयेत वायव्यादिपदे तु सर्वपदार्थानां स्वार्थेवा
पुंस्त्वं स्यादनुवादः फलार्थप्राप्तु तत्वभोजन
मिवश्चालंभादिरागप्राप्तमपि प्राप्रयत्वेन संबध्यते
सर्वप्रधानकर्मान्तरे स्वंवनुष्ठप्रकरणेयो गुणः सो
पिनकर्मभेदकत्वकगुणसंक्रान्तशक्तित्वेन विधेः क
र्मशाहलाभावात् कर्मान्तरत्वे च विनियुक्तद्रव्यक
त्वेन लोकप्रसिद्धसंस्कारत्वानुपपत्तेश्चेति व्याख्ये
यं यावदुक्तंवाकर्मणः प्रकृतिमूलत्वात् नाप्याल
भाद्यनुवादेन गुणविधिः तथात्वे फलपदस्य स्वार्थ
स्यवाक्यान्वयाभावेनाविदितार्थतापत्तेः अश्वप्र
तिग्रहेष्टौ तु वाक्यभेदापत्तेस्तथ्यागीकरणप्रदेशः
पुंवत्वालंभादेर्लौकिकस्यापि सत्वाद्दार्शिकसं
वानुवादे प्रमाणाभावः न चाश्वप्रतिग्रहेष्टे
र्विधिरपि तन्नान्तर्यग्राहक इति शंक्यं तथां
गीकारेपि विधायकाभावेन गुणविधाना
नुपपत्तेः अतो दार्शिकसंवालंभादेर्विशेषणत्वउ
पस्थितभावान्नानुवादेन गुणविधिः नापि
गुणफलसंबंधः ॥

श्वालंभादेःप्रकरणाभावेनाश्रयत्वानुपपत्तेःभोज
नस्यतुस्वर्गोत्तरभाविनिषेधविषयत्वेनोपस्थितत्वा
दाश्रयत्वोपपत्तिरित्युक्तंव्याकरणाधिकरणे अतो
गुणफलरूपानेकगुणोपादानात्प्रकरणेनराश्व
कर्मांतरमेवालंभनिर्वापरूपगुणविशिष्टफलो
द्देशेनविधीयतेवातुस्यावपिवास्मिन्पक्षेनकालो
त्वार्थत्वसंबंधेनक्रियात्वंयप्रतिपद्येनेउद्धार्यत्वापर
पूर्वोयमुद्देश्यत्वमेवदेवतात्वंतत्त्यज्यमानद्रव्योद्देश्य
त्वंगौरवात् अतोदेवतात्वस्ययागात्वेपकत्वाभावा
द्यागकल्पनेपिप्रमाणाभावः अतोयावदुक्तंविधान
मेवेदंनतुगुणमात्रस्यपंचहविकर्मणोयावत्वर्थस्यपद
स्मृतिमूलकविधानमात्रंतंभवतीतिसूत्रार्थः य
जेतिलक्षद्रव्यफलभोक्तृसंयोगादेतेषांकर्मसंबंधात्
नेदंश्रौततयात्वर्थविधानं तथात्वेउपक्रमस्यदेवता
त्वावितद्विनानुपपत्तेःनचोद्देश्यत्वमेवदेवतात्व
मत्कभाजोहविर्भाजश्चदेवताइत्यादिस्मृत्यावैदिक
व्यवहाराच्चस्तुतिभाक्रूपदेवतात्ववत्यज्यमानह
विरुद्देश्यत्वस्यत्वस्यैवदेवतात्वात् अतएवब्राह्मणो
द्देशेनपक्षेष्वमेनतुद्देशेनान्येदेवतात्वप्रसिद्धिः
अतएवद्रव्यरूपहविःसंयोगादविभाक्तरूपमेवदे
वतात्वमत्रतद्धितार्थःतस्यचयागैकचोदितत्वाद्या
गापेक्षायांप्रमाणांतरेणतस्यप्राप्तत्वादनेनैवचा
केनविधेयत्वप्राप्तौअध्याहारापेक्षापालक्षणयापाल
स्तुत्वाद्यावलनायागोलक्ष्यते शाकार्थस्तुप्रमाणांतर

कौ
हि
२५

प्राप्तत्वादनूद्यते लाक्षणिकपदोपादानप्रयोजनं
चनिर्वपत्यादिधात्वमहाकासंबंधिवहप्रकृति
सादृश्यसिद्धिः यागविधिप्रकारश्चास्माभिरनाग
तावेदगुणन्यायेनाग्नेयाधिकरणएवप्रदर्शितः
तस्मात्फलोद्देशद्रव्यदेवताविशिष्टयागभावना
विधिरेवायमिति शुक्लमेवात्रगुणभेदकत्वं स
चैतद्रव्यस्य भोक्तृपदवाच्यदेवतायाश्चसंयोगा
द्यागएवात्रविधीयते सोपिचफलसंयोगादर्थ
कर्मत्वेनएतेषांद्रव्यफलभोक्तृणांयागंगतार्थ
कर्मत्वेनव्याप्तत इतिभाष्यं यद्यपिचद्वितीय
एवंपत्ववादिनानसंस्कारकर्मत्वमंगीक्रियते
तथापिप्रथमएवंपत्ववादिनातदंगीकरणात्त्वा
नभिमतत्वसूचनार्थंसिद्धांतेऽर्थकर्मत्वहेतुतया
फलग्रहणं ॥ लिंगदर्शनाच्च ॥ सो
मारौद्रंचरुंनिर्वपेदितिप्रकृत्यपरिशिष्टेनाज
येदितिगुणविधिपरेवाक्येयजिश्रवणाद्द्रव्यदे
वतासंबंधाद्यागानुमितिरित्युपोद्बलयति प्रयो
जनंसमृढं ॥ ५ ॥ विशयेप्रा
यदर्शनात ॥ अग्निहोत्रदोह्यादि
कारेवत्समालभेतेतिश्रुतेतत्रकिंअग्नीषोमी
ययागानुवादेनवत्सविधिरुताग्निहोत्रदोहसा
गत्वेनवत्सद्रव्यकयागविधिरुतवत्ससंस्कार
र्थत्वेनालंभमात्रविधिरिति ॥ अत्रा

त्रापवादिकोऽप्यनेन संगतिः तत्रैवेदम्प्रयुक्तालभते
रोषामालभेतेत्यादौ स्पर्शमात्रवाचित्वेपि देवतादि
वाक्येषु प्राणिसंयोगे यागवाचित्वावगमात्तादर्थ्य
प्राप्यालंभविधिर्युक्तः इष्यते च धातूनामनेका
र्थत्वात् गमनार्थकस्यापि गमेः स्त्रीसंयोगे मैथु
नार्थकत्वं अतो यागार्थकस्यालभतेः प्रकृतेहि
मानतुवारत्वेपि प्रकृतिभूताग्नीषोमीययागानु
वादकत्वात् तदनुवादेन विनियोगभंगकल्पनया पि
वत्सविधिः अतश्च वाक्याय वत्सजात्यामात्रवर्णिक
छागजातिबाधेन विकल्पेन वा वत्सविधिरिति प्रथ
मः पक्षः द्वितीयपक्षे नालभतेर्यागवाची स्पर्शवा
चकस्यैव तादिवाक्ये देवतापरसमभिव्याहारेण
यागलक्षकत्वांगीकारात् अतश्च वत्समालभेतेत्य
त्रापि उपवसीति वत्समुपावसृजतीति विनियुक्त
मंत्रवर्णिकल्पदेवतावलेनाग्निरेव यागकल्पनो
पपत्तेः स्पर्शं यागलक्षकत्वमेव अत्र द्वितीयावस
जनेमंत्रविधिः तथात्वेन तस्यापि मंत्रवर्णिकदेव
ताकल्पनया यागकल्पनापत्तेः अतो विशिष्टविधि
गौरवपरिहारार्थं वत्समालभेतेत्यत्र विहितस्यै
वनाकल्पनेन फलकमंत्रमात्रविध्युपगमाद् उपा
वसृजनैरपि यागलक्षणार्थत्वमवगम्यते अत
श्च वत्सद्रव्यकपूर्वदेवताकोऽग्नीषोमीयप्रकृति
कोयागोः ग्रिहोत्रांगत्वेन विधीयत इति सिद्धं
तस्य कृष्णसीत्यस्य भाष्टिगुणयोगेनोरतुकत्वे
नवाभुरोपाख्यिलवत्सपरामर्शकत्वोपपत्तेः शा
कोपावसर्जनांगत्वेनैव मंत्रविध्यवसायान्न या

कौ
द्वि व्या
२६

गकत्वकानोपपत्तिः अतस्तद्द्वितीययावत्सत्वमुद्दि
श्योपाकरणस्रजनविधिव दालंभात्स्वसंस्कारविधि
रेवायमर्वच संस्कारविधिप्रायपाठोपपन्नो भ
वतिनचोपाकरणस्रजनेनैवस्पर्शात्स्वस्यालभस्या
र्थप्रामतात्रविधुपपत्तिरिति वाच्यं येनविधेयो॰
गात्स्वोपाकरणस्रजनेन तथैव समीपधारणफलका
धर्मकर्तृकस्पर्शस्यानियमेन प्राप्त्यभावात् अत
एवतत् अतोवत्ससंस्कारार्थ+ पमालंभविधिरद
ष्टार्थतापत्तिपयुक्तेगोमस्तवेहतलावात नैवदोह
नानुपपत्तिः तस्मान्यकर्तृकत्वेन बाधकाभावा
+त्वेनालंभविधिरेवायमत्रैवविशेषसंशयेसं॰
स्कारप्रायपाठदर्शनान्निर्णय इतिव्याख्येयं अ
र्थवादोपपत्तेश्च वत्सानिकानादिपशवइति अर्थ
वादेपशूनां वत्सप्रियत्वात्समीपधारणफलस
र्शेणाग्रस्तवनंजायत इति स्फुटेरालंभविधित्वे
स्त्वनुपपद्यते न यागपरत्वे प्रयोजनेन स्पष्टं अत्र
वसिद्धांते दर्शपूर्णमासिकेषालंभादयमालंभः
संस्कार्यस्तूपाकुपादेयगुणयोगात्प्रकरणात तत्स्या
येनकर्मीतरंसिध्यतितन्नवत्सात्स्वेगुणस्यापि
त्विनविधेयतालकसमेदप्रयोजकत्वात्पादसंग
तिः अध्यायसंगतिश्च ९ संयुक्तस्तर्थशाहेतत
दर्शश्रुतिसंयोगात् अग्नौनैवारस्य चतुर्भवतिह
हस्पतेवाप्यतदत्रयन्त्रीवाराहत्तुकाचहमुपर
धातीतिश्रुतं तत्र किंचतुर्द्धाबहहस्पतेर्देवता
वभावनाधानस्यैयोर्भेदिकाउतनेति संशयः
नत्रपूर्वपदेनैवारवाकेवतलपस्यद्वयस्त्रा

र्थवादिकाद्बृहस्पतिदेवतायाप्राप्तिमत्रन्याये
नाविधेयत्वात्सिद्धान्ते वाविधेयत्वादनिश्चितविधे
यताकस्य द्रव्यदेवतादिस्वगुणस्य भेदकत्वनि
रूपणान्यायाध्यायसंगतिः अनेनतत्राघ्याप्तिसीप
स्य द्रव्यपरत्वेनैवोपपत्तेर्नमांत्रवर्णिकदेवताक
ल्पनद्वारायागपरत्वनिष्ठापकत्वं प्रकृतेत्वत्र
र्थवादस्य बृहस्पतेरन्यपरत्वासंभवाद्याद्यवादिक
देवताकल्पनावधिभावेनयागकल्पनोपपत्ते
धुकाभेदकत्वेतिपूर्वपक्षेऽस्यानादृष्टत्वा तत्र
नैवारवाकैलावदवत्यादिमायूनैरकरणका
यांभावनायामप्राप्तिबलाधविधिनाविहितायां
वरोः प्रयोजनाकांक्षाभावनायाश्चावकेद
थानर्थापत्तत्वाययाकिंचिदानर्थकल्पनमावश्य
कं नचोपधानमेवमस्त्विति शंक्यं उपधानं प्रति
वरोर्हितीययासंस्कार्यत्वावगमेन करणत्वासं
भवात् अतएव उपधानभावनातोभिन्नैव पंच
त्रुव्यकयागकरणिकाभावना नचैवमपिदेव
ताभावाद्यागत्वापकाभावः अर्थवादेहि बृहस्पते
रघ्यानीवारसंबंधावगमात्संबंधोत्पत्त्यसंभवे
नदेवतात्वस्यैवावगतेस्तस्य चयागंविनानुपप
त्तेर्यागत्वप्रत्ययात् तैत्तरीयशाखायांतु बार्ह
स्पत्योभवतीत्येवं तद्धितान्तताबार्थवादः अ
तइतिदेवतात्वावगतिस्पष्टैव: अतोद्रव्यदेवता
संबंधानुमितोयागयवाग्रेयप्रकृतिकोविधी

कौ
द्विथा
८

यतेवसूमुपदधातीति तृसिष्टकाद्वारि प्रतिवा
येनप्रतिपत्त्यंतरविधिरिति प्राप्तेः अभिधीयते स
र्वत्रविध्यपेक्षितपदार्थोर्थवादोन्नीतविधिना
विधीयतेननतपेक्षितइति स्थूलंपर्णातादौप्रक्र
तेवनेवारवाकेयद्यपिनेवारचतुर्विशिष्टभा
वनाविधिः स्यात्तथापितस्याः प्रयोजनाकांक्षा
तीयामुपधानस्यैवक्लृप्तत्वेनान्वयोपपत्ते
नार्थवादोदेवतादिकल्पनायेप्रभवति नैवं
वनोर्हितीयांतत्वानापत्तेः उपदधातेः सकर्म
केनवस्तुमितिद्वितीयायाम्लानोक्षितकर्मत्वेनानु
पपत्तेः वस्तूनस्क्लृप्ततादर्थ्याविशेषसंकोषविक
ल्पानवलत्वात्प्रयायाश्चावश्यकत्वाद्वाक्यद्वयेपिवि
धिगौरवापत्तेश्चनैवारवाकेपिनीवारमात्रमे
वप्रकृतित्वसंबंधेनचतुःकर्मकभावनानुवा
देनविधीयते उपधानवाक्येतुचतुःसंस्कारक
त्वेनविहितमप्युपधानंसंस्कारविधानसध्यानुप
पत्याअपूर्वमुत्पादयतीति तद्वयोः सामर्थ्यात्क
र्मोपयोगित्वस्यानिश्चयात्तत्वेनोपयोगंकल्प
यति अतस्तत्सामर्थ्यकाल्पितेनविधिनाचतुः
भावनायाः प्राप्तत्वात्तदनुवादेननीवारमात्र
विधिर्नानुपपन्नः नचस्थलनिष्पत्तेः श्रौतेष्ट
कावत्तदुत्वेनकल्पितेचतुःसाध्यत्वानुपप
त्तेरर्थ्यकर्मैवेदमुपधानंचयनप्रदेशोविधीय
तइतिकेचिदाविदुःतंयुक्तं चतोभवदेवोक्तविध

याऽऽहवकास्त्रंधिकरणार्थतयाविधेयत्वेनेष्टका
विरोधित्वाभावात् अन्यथाप्रयर्थकर्मत्वपक्षेपि
प्रानुषंगिकाः स्थलानिष्पत्तेराधारयकत्वेनेष्टका
विरोधस्यड: परिहृतत्वात् अतस्त्रोतकर्मत्वसा
गेप्रमाणाभावेनचतुर्विनियोगाविधिकल्पनानन्त
रत्ववादेनत्रीवरमात्रविधिरेवयुक्तः अतस्थविधे
रैवतानांकांक्षत्वान्नार्थवादतत्कल्पनं अतए
वयत्रापेक्षातत्रैवतत्कल्पनमिष्टंयथीहरणीक्र
तिविधिवाक्यशेषे अन्नं पवापतमात्मनोजनय
तेयदग्निरिति वाक्यशेषाद्य्ने: प्रकृतत्वनयेष्ट
वान्नतत्कल्पकत्वमितिविशेषः अतएवमनुस्यन्त
ब्राह्मणस्योत्कमित्यादिस्मृतिपर्यालोचनयाबृह
स्पतेर्ब्राह्मणस्यमनुष्यत्वभूतानीवाराग्नत्वमिति
अर्थवादोव्याख्येयः तैत्तरीयशाखायामर्थवादरहा
तत्वेनापिअनेनैवसंबंधेनव्याख्येयोनतुदेव
तात्वपरः देवतात्वस्यतज्ज्यमानरत्नोद्देश्यत्वसति
विहितत्वपर्यंतस्यहेतुस्यावतारसिद्धतयाविधि
समभिव्याहाराभावेअप्रतीतेः नचयद्दानेयाद्या
दिवाक्यस्थविधिकल्पनाविध्यंतरैकवाक्यता
भंगभयेनतदनुपपत्तेः अतोनैवारवाक्येया
गोपत्वातत्करणकंभावनांतरमितिसिद्धं प्रयोज
नस्पष्टं स्त्रत्वेनस्थलनिष्पत्तिहृपार्थोनायकेनश
हेनउपदधातिनासंबुक्तप्रयोज्यस्य रणैरावस्थलनि
ष्पत्त्यर्थपवः तादृशप्रयोजनोन्नायकस्याहृसंयो

तास्यैश्रौतत्वादितिवाच्यं ॰ पात्नीवतेत्वष्टुर्वि
कौ° नादेवश्छेद त्वाष्ट्रंपात्नीवतमालभतेत्यनेनयागंवि
द्विप्या° धायाम्नायतेपर्यग्निकृतंपात्नीवतमुत्सृजतीति
२८ तत्रकिंकर्मांतरविधिरुतपूर्वस्मिन्नेवयागेगुण
मात्रविधिरितिचिंत्यते॰ पत्नीवद्देवतात्वगुण
स्यगुणस्यानिश्चितत्वविधेयत्वात्कस्यैवभेदकत्वावि
चारात्पादाध्यायसंगतिः पूर्वत्राग्निवादस्यतद्धि
तस्यदेवतापरत्वेनिरर्थत्वेविधिपक्षस्यत्वंहितिः सं
देहेदेवतापरत्वोपपत्तेर्यागानुमापकत्वोपप
त्तिरितिपूर्वपक्षोत्थानादत्रैतच्च॰ तत्रयद्यपि
पूर्वयागोपस्थापकंप्रकरणमस्तितथापित
